Total No. of Questions : 7 Total No. of Printed Pages : 3

**Code No.: MR-04**

# स्नातकपरीक्षाः- २०१५

## बि.ए. - विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम् - अलंकारशास्त्रम्

**भागः - २, पत्रिका - ४**

**विषयः - मृच्छकटिकम्**

**दिनाङ्कः -** 4-4-2015 **गरिष्ठाङ्काः - १००**

**समयः -** 10.00 A.M. to 1.00 P.M. Max. Marks - 100

---

**I. एकवाक्येन उत्तरं लिखत** **10×1=10**

१. मृच्छकटिकं रूपकेषु कस्य प्रभेदस्योदाहरणम्?

२. नायकाः कतिधा विभक्ताः?

३. मृच्छकटिकस्य कथावस्तु कीदृशमस्ति?

४. मृच्छकटिकस्य प्रतिनायकः कः?

५. मदनिका का?

६. कस्य सौहृदादपि जनाः शिथिलीभवन्ति?

७. नारी कुत्र गृह्यते?

८. असमुद्रोत्थितं रत्नं किम्?

९. कस्य गृहं शून्यम्?

१०.अपरं षष्ठं महापातकं किम्?

**II. लघूत्तराणि लिखत** **5×2=10**

१. शत्रुः कथं व्यापादनीयः?

२. एककार्यनियोगेऽपि कथं न तुल्यशीलता?

३. वसुन्धरा कैःभाराक्रान्ता वर्तते?

४. पातकी विप्रः किं दण्डनीयः?

५. ब्राह्मणानां विभूषणं किम्?

- अनुवर्तते

**III. पुटपरिमितं प्रश्नान् उत्तरत** 4×5=20

१. मृच्छकटिकस्य कर्तुः देशकालादिकं विमृशत।

२. मृच्छकटिकस्य पञ्चमाङ्कस्य कथां संगृह्य लिखत।

३. मृच्छकटिकस्य अद्यतनोपयोगितां प्रकारणानुगुणं विलिखत।

४. मृच्छकटिके राजकीयबलयुतः शकारः कथं चित्रितः? विवृणुत।

**IV. पद्यानां सान्वयमर्थं विलिखत (चतुर्णाम्)** 4×5=20

१. अन्धकारे पलायमाना माल्यगन्धेन सूचिता।
केशवृन्दे परामृष्टा चाणक्येनेव द्रौपदी।।

२. तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः।

३. द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च।
सम्प्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः।।

४. प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात् कथञ्चित्।
सुरपतिभवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव।।

**V. सप्रसङ्गं व्याख्यात (चत्वारि वाक्यानि)** 4×3=12

१. क्व नु खलु गताः कुशीलवा भविष्यन्ति?

२. दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।

३. बहुदोषा हि शर्वरी।

४. आगच्छ रे चारुदत्त! आगच्छ! इदं घोषणस्थानम्? आहत डिण्डिमम्।

**VI. टिप्पणीं रचयत (चतुर्णाम्)** 4×3=12

१. नान्दी २. प्रकरणम्

३. वसन्तसेना ४. मैत्रेयः

**VII. यथानिर्देशं लिखत**

**१. विभज्य सन्धिनाम लिखत** 4×1=4

१. यदार्यः २. सुहृच्च

३. ममार्यपुत्रः ४. सार्थवाहस्योदवसितम्

- अनुवर्तते

**२. विगृह्य समासनाम लिखत** **4×1=4**

१. सिद्धादेशप्रत्ययपरित्रस्तः  २. त्वरितगतिः

३. गौरीभुजलता  ४. परिपूर्णेन्दुमुखः

**३. अत्रत्यमलंकारं सलक्षणं विवृणुत** **4**

व्याधानुसारचकिता हरिणीव यासि।

**४. प्रस्तारं विलिख्य सलक्षणं वृत्तनाम लिखत** **4**

तयोरिदं सत्सुरतोत्सवाश्रयम्

---